# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| कक्षा- आचार्य-१ (SEM-1) | प्रश्नपत्र-४ | गुणा: - ७० |
| विषय:- साहित्यम् ( ध्वनिवर्ग: ) | CC-413(2) | समय: - ०३ त: ०६ |
| दिनाङ्क: - ०८/१२/२०१६ | सन्दर्भग्रन्थ: - ध्वन्यालोक: - द्वितीय: उद्योत: | |

**॥ प्रथमान्विति: ॥**

**प्र-१ कस्यचिदेकस्य ससन्दर्भं व्याख्यां कुर्वन्तु ।** ०४

१. रसाभास-तदाभास-भावशान्त्यादिरक्रम: ।
ध्वनेरात्माऽङ्गिभावेन भासमानो व्यवस्थित: ॥

२. प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादय: ।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मति: ॥

**प्र-२ विवक्षितान्यपरवाच्यध्वने: भेदद्वयं प्रतिपाद्य असंलक्ष्यक्रमव्यङ्ग्यस्य स्वरूपं प्रकाशयत ।** १२

**अथवा**

**रसादीनां कथं प्रतीतिरिति विषये भट्टलोल्लटमतं निराकृत्य अभिनवगुप्तमतं पर्यालोच्यताम् ।**

**प्र-३ द्वयो: संक्षेपेण उत्तरं लिखत ।** ०४

१. अत्यन्ततिरस्कृतवाच्यस्य उदाहरणं किम्?

२. रसादिरलङ्कार: कतिविध:? लिखत ।

३. चारुत्वहेतवे के प्रसिद्धा:?

**॥ द्वितीयान्विति: ॥**

**प्र-४ कस्यचिदेकस्य ससन्दर्भं व्याख्यां कुरुत ।** ०४

१. श्रृङ्गार एव मधुर: पर: प्रह्लादनो रस: । तन्मयं काव्यमाश्रित्य माधुर्यं प्रति तिष्ठति ॥

२. रौद्रादयो रसा दीप्त्या लक्ष्यन्ते काव्यवर्तिन: । तद्व्यक्तिहेतुशब्दार्थावाश्रित्यौजो व्यवस्थितम् ॥

**प्र-५ ध्वनिकारानुसारेण गुणालङ्कारयो: लक्षणमुक्त्वा तेषां पृथक् विषयत्वं प्रतिपाद्यताम् ।** १२

**अथवा**

**अलङ्कारा: शब्दार्थनिष्ठा रसनिष्ठा वेति विवेचयत ।**

**प्र-६ संक्षेपेण द्वयोरुत्तरं लिखत ।** ०४

१. ध्वन्यालोके प्रसादस्य लक्षणं किमुक्तम्?

२. श्रुतिदुष्टादय: के दोषा:?

३. अनित्यदोषा: नाम किं सूचयन्ति?

**॥ तृतीयान्विति: ॥**

**प्र-७ कमपि एकं ससंदर्भं व्याख्यायताम् ।** ०४

१. दिङ्मात्रं तूच्यते येन व्युत्पन्नानां सचेतसाम् ।
बुद्धिरासादितालोका सर्वत्रैव भविष्यति ॥

२. ध्वन्यात्मके श्रृङ्गारे समीक्ष्य विनिवेशित: ।
रूपकादिरलङ्कारवर्ग एति यथार्थताम् ॥

**प्र-८ रसध्वन्यात्मके काव्ये अलङ्काराणां हेयोपादेयता कथं ज्ञायत इति ध्वनिकारमतं स्पष्टयत ।** **०८**

**अथवा**

**ध्वनेर्भेदान् ग्रन्थोक्तदिशा प्रदर्शयत ।**

**प्र-९ त्रयाणां लघूत्तराणि लिखत ।** **०३**

१. कः परः प्रह्लादनो रसः?

२. श्लेषः कुत्र भवति?

३. श्रृङ्गारस्य स्थायिभावः कः?

४. अर्थान्तरन्यासध्वनिः कतिविधः?

५. कमाश्रित्य माधुर्यं प्रतितिष्ठति?

**॥ चतुर्थान्वितिः ॥**

**प्र-१० कस्याप्येकस्य ससन्दर्भं व्याख्या कार्या ।** **०४**

१. शब्दार्थशक्त्या वाऽऽक्षिप्तो व्यङ्ग्योऽर्थः कविना पुनः ।
यत्राविष्क्रियते स्वोक्त्या साऽन्यैवालंकृतिर्ध्वनेः ॥

२. यत्र प्रतीयमानोऽर्थः प्रक्लिष्टत्वेन बासते ।
वाच्यस्याङ्गतया वाऽपि नास्यासौ गोचरो ध्वनेः ॥

**प्र-११ अर्थशक्तिमूलध्वनिं विस्तरेण प्रतिपादयत ।** **०८**

**अथवा**

**संक्षेपेण गुणीभूतव्यङ्ग्यकाव्यलक्षणं निर्दिश्यताम् ।**

**प्र-१२ त्रयाणाम् उत्तराणि लिखत ।** **०३**

१. ध्वन्यालोके कति उद्योताः सन्ति?

२. द्वितीयोद्योतस्य वर्ण्यविषयः कः?

३. आन्दवर्धनाचार्येण कस्य सम्प्रदायस्य स्थापना कृता?

४. ध्वन्यालोकस्य प्रसिद्धा टीका का?

५. दोषस्य किं लक्षणम्?